इति स्वहस्तोल्लिखितञ्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखरः ॥”
चन्द्रयुक्तः शेखरः शृङ्गं यस्य ।) पर्व्वतविशेषः ।
यथा, आगमे शिववाक्यम् ।
“विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥”
(तथा, महालिङ्गेश्वरतन्त्रे ।
“शम्भुनाथश्चन्द्रनाथश्चन्द्रशेखर पर्व्वते ॥”)
चट्टलदेशे महापीठे भैरवविशेषः । यथा,—
“चट्टले दक्षबाहुर्म्मे भैरवश्चन्द्रशेखरः ।
व्यक्तरूपा भगवती भवानी तत्र देवता ॥
विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥”
इति तन्त्रचूड़ामणौ ५१ पीठनिर्णयः ॥
करवीरपुरराजा । स च पौष्यराजपुत्त्रः । यथा,—
“अथ काले व्यतीते तु सर्व्वज्ञो वृषभध्वजः ।
तद्भावविक्रमैश्चापि मानुषो ह्यभवत् स्वयम् ॥
ब्रह्मणो दक्षिणाङ्गुष्ठाद्यो ब्रह्मसुतोऽभवत् ।
अदितिस्तत्सुता जाता ततः पूषाऽप्यभवत् ॥
पूष्णः पुत्त्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
यस्य तुल्यो नृपो भूमौ न भूतो न भविष्यति ॥
स पुत्त्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ।
शेषे वयसि सम्प्राप्ते भार्य्याभिस्तिसृभिः सह ॥
पौष्यः परमया भक्त्या ब्रह्माणं पर्य्यतोषयत् ।
तस्य प्रसन्नो भगवान् ब्रह्मा लोकपितामहः ॥
तमुवाच स राजानं किमिच्छसि वदस्व मे ।
प्रसन्नोऽस्मि नृपश्रेष्ठ ! प्रदास्यामि यथेप्सितम् ॥
यदिदं तव जायानां तत्तद्दास्यामि साम्प्रतम् ॥
पौष्य उवाच ।
हिरण्यगर्भापुत्त्रोऽहं पुत्त्रार्थी त्वामुपाश्रये ।
त्वयि प्रसन्ने पुत्त्रो मे भवेल्लक्षणसंयुतः ॥
एतदर्थं सभार्य्योऽहं भक्त्या त्वां समुपस्थितः ।
यथा मे जायते पुत्त्रस्तथा कुरु जगत्पते ! ॥
पुन्नाम्नो नरकात् पुत्त्रस्त्रायते पितरं ध्रुवम् ।
अतस्तस्माद्भयं ब्रह्मन् ! त्वं नाशयितुमर्हसि ॥
ब्रह्मोवाच ।
शृणु पौष्य ! यथा भावी पुत्त्रस्तव कुलोद्वहः ।
तदहं ते वदाम्यद्य भार्य्याभिस्तत् समाचर ॥
इदं फलं गृहाण त्वं मया दत्तं नृपोत्तम ! ।
अजीर्णं बहुले काले प्राप्तेऽपि सुरसं सदा ॥
फलमेतत् समादाय यावत् संवत्सरद्वयम् ।
आराधय महादेवं सुप्रसन्नो भविष्यति ॥
यथा संभावते भर्गः फलमेतत्तथा भवान् ।
करिष्यति फलं राजन् ! भार्य्याभिस्तिसृभिः सह ॥
ततस्ते भविता पुत्त्रस्तव कुलवर्द्धनः ।
भविष्यति च यः शास्ता चक्रवर्त्ती भविष्यति ॥
इत्युक्त्वा प्रययौ ब्रह्मा राजापि सह भीरुभिः ।
हरं यष्टुं समारेभे भक्त्या परमया युतः ॥
निराशी संयताहारः कदाचित् फलभोजनः ।
दृषद्वतीनदीतीरे फलं संस्थाप्य चाग्रतः ॥
पुष्पार्घ्यधूपदीपाद्यैर्वृषध्वजमतर्पयत् ।
स तु वर्षद्वयेऽतीते महादेवो जगत्पतिः ॥
पौष्यस्य नृपतेः सम्यक् प्रसादार्थसिद्धये ।
प्रसन्नः प्राह नृपतिं महादेवो हसन्निव ॥

उपासते किमर्थं मां तन्मे वद ददामि ते ॥
पौष्य उवाच ।
अपुत्त्रोऽहं पुत्त्रकामः पूजयामि वृषध्वज ! ।
यथाहं पुत्त्रवान् वै स्यां वृषध्वज ! तथा कुरु ॥
इति संश्रवदद्राजा भार्य्याभिः सह हर्षितः ।
प्रणम्य स्तुतिपूर्व्वेण भक्तिनम्रात्ममानसः ॥
ततः पुत्त्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
ब्रह्मदत्तफलं हस्ते कृत्वेदं तमुवाच ह ॥
ईश्वर उवाच ।
इदं फलं ब्रह्मदत्तं विभज्य नृपते त्रिधा ।
भोजयैताः स्वजायास्त्वं प्रहृष्टः सुस्थमानसः ॥
ततः प्रवृत्ते भवत एतासु ऋतुसङ्गमे ।
आधास्यन्ति च गर्भांस्तु भार्य्यास्ते युगपन्नृप ! ॥
काले प्राप्ते च युगपत् प्रसवो योषितां तव ।
भविष्यति नृपश्रेष्ठ ! ता एवं त्वं करिष्यसि ॥
एकस्या जठरे शीर्षं भार्य्यायास्ते भविष्यति ।
अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति ॥
अधो नाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति ।
ततः खण्डत्रयं भूप ! यथास्थानं पृथक् पृथक् ॥
योजयिष्यसि पश्चात्ते पुत्त्र एको भविष्यति ।
तस्य शीर्षे चन्द्ररेखा सहजा संभविष्यति ॥
तेनैव नाम्ना स ख्यातिं गमिष्यति च भूपते ! ।
इत्युक्त्वा स महादेवस्तासां गर्भान् स्वयं तदा ॥
संस्कर्त्तुं जाह्नवीतोयमात्मनः शिरसो न्यधात् ।
ततः फले स्वयं देवः प्रविवेश वृषध्वजः ॥
तत्प्रभावात् तत् फलं भूतं त्रिभागं स्वयमेव हि ।
पौष्यस्तत् फलमादाय मुदितः सह भार्य्यया ॥
प्रययौ मन्दिरं हृष्टो अनुज्ञाप्य वृषध्वजम् ।
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम् ॥
तत् फलं नृपशार्दूल ! गर्भाश्चाप्याहिताः शुभाः ।
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत ॥
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् ।
तत्र खण्डत्रयं पौष्यो यथास्थानं नियोज्य च ॥
एकं पिण्डं चकाराशु तत्र पुत्त्रो व्यजायत ।
तस्य शीर्षे तदा राजन् सहजेन्दुकला शुभा ॥
विरराज यथा स्वच्छा शरत्काले कला विधोः ।
तं सर्व्वलक्षणोपेतं पीनोरस्कं सुनासिकम् ॥
सिंहस्कन्धं विशालाक्षं दीर्घायतभुजं तदा ।
दृष्ट्वा पौष्योऽथ भार्य्याभिस्तिसृभिः सह संमुदम् ॥
लेभे दरिद्रः सत्कोषं प्राप्येव विपुलं ततः ।
तस्य नामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः ॥
चन्द्रशेखर इत्येवं कान्त्या चन्द्रमसः समः ।
ववृधे स महाभागः प्रत्यहं चाप्यवर्द्धयत ॥
कलाभिरिव तेजस्वी शरदीव निशाकरः ।
एवं तिसृणामम्बानां गर्भे जातो यतो हरः ॥
अतस्त्र्यम्बकनामाभूत् प्रथितो लोकदेवयोः ।
स राजपुत्त्रः कौमारावस्थां प्राप यदा तदा ॥
सर्व्वशास्त्रार्थतत्त्वज्ञो जिग्योत्सुको बभूव ह ।
बले वीर्य्ये प्रहरणे शास्त्रे शीले च तत्समः ॥
नाभ्योऽभून्नृपशार्दूल ! नो वा भूमौ भविष्यति ।
अभिषिच्याथ तं बालं कुमारं बलवत्तरम् ॥
रूपपत्न्येकवीर्य्यं सर्व्वराजगुणैर्युतम् ।

तिसृभिः सह भार्य्याभिर्वनं पौष्यो विवेश ह ॥
इहोचितक्रियां कर्त्तुं राजा परमधार्म्मिकः ।
गते पितरि राजा स वनवासं महाबलः ॥
सर्व्वां क्षितिं वशे चक्रेऽमात्यैः स चन्द्रशेखरः ।
सार्व्वभौमो नृपो भूत्वा राजभिः परिवेष्टितः ॥
अमरैरिव देवेन्द्रो विजहार श्रिया युतः ।
एवं पौष्यसुतो भूत्वा त्र्यम्बकः प्राप्य निर्वृतिम् ॥
ब्रह्मावर्त्ताह्वये रम्ये करवीराह्वये पुरे ।
दृषद्वतीनदीतीरे राजा भूत्वा समोद ह ॥”
इति कालिकापुराणे ४९ अध्यायः ॥ * ॥
(स्वनामख्यातः पण्डितविशेषः । असौ हि सिद्धपुरुषः त्रिवेणीसन्निकर्षस्थवन्धपाड़ाख्यग्रामे १६०० शकस्य प्रारम्भ एव वर्त्तमान आसीत् । अद्यापि तस्य सिद्धिस्थानं तत्रैव वर्त्तते । अयं नानाशास्त्रवेत्ता विशेषतो ज्योतिषशास्त्रेषु लब्धप्रतिष्ठो बभूव । एतत्संकलिता बहवो ग्रन्था अस्मद्देशेऽद्यापि प्रचरन्ति ॥ * ॥)
षोड़शध्रुवकान्तर्गतनवमध्रुवकः । तद्विवरणं ध्रुवकशब्दे द्रष्टव्यम् ॥ अपि च ।
“ऊनविंशतिवर्णाङ्घ्रिः सिद्धिदश्चन्द्रशेखरः ।
कथितः केन्द्रके ताले भवेत् शृङ्गारवीरयोः ॥”
इति सङ्गीतदामोदरः ॥
(वटिकौषधविशेषः ।
“स्रुतो गन्धरसौ सोषणः स्या-
देतैस्तुल्या शर्करा मत्स्यपित्तैः ।
भूयो भूयो भावयेत्तु त्रिवारं
वल्लो देयः शृङ्गवेरस्य वारा ॥
सम्यक् तापे वारिभक्तं ससक्तं
दत्ताकाण्डं पथ्यमेव प्रदिष्टम् ।
अङ्गे रोगं हन्ति सामं प्रभावात्
पित्ताधिक्ये वर्द्धि वारिप्रयोगः ॥”
इति उदकमञ्जरीरसः ॥
“अत्रैव शर्करां व्यक्त्वा शिला च यदि दीयते ।
गुणैः समो भवेदस्य नाम्ना च चन्द्रशेखरः ॥”
इति चन्द्रशेखरो रसः ॥)
चन्द्रसंज्ञः, पुं, (चन्द्रस्य संज्ञा संज्ञा यस्य ।) कर्पूरम् । इत्यमरः । २ । ६ । १३० ॥
चन्द्रसम्भवा, स्त्री, (चन्द्रः सम्भवो यस्याः ।) सूक्ष्मैला । इति शब्दचन्द्रिका ॥ (बुधे, पुं ॥)
चन्द्रहासं, क्ली, (चन्द्रस्येव शुक्लो हासः प्रभा यस्य ।) रौप्यम् । इति राजनिर्घण्टः ॥
चन्द्रहासः, पुं, (चन्द्रस्येव शुक्लो हासो दीप्तिर्यस्य ।) खड्गः । रावणखड्गः । इति मेदिनी । से, ५२ ॥
चन्द्रहासा, स्त्री, (चन्द्रहास + टाप् ।) गुड़ूची । इति राजनिर्घण्टः ॥ (चन्द्रवदाह्लादकरो हासो यस्याः इति । गायत्त्रीरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ४८ ।
“चन्द्रहासा चारुदात्री चकोरी चन्द्रहासिनी ॥”
इहती । तस्याः पर्य्याया यथा,—
“क्षुद्रायां क्षुद्रभण्टाक्यां इहतीति निगद्यते ।
श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षेत्रदूतिका ॥